# Adividyamaheshvari Stuti

# आदिविद्यामहेश्वरीस्तुतिः

## Document Information

Text title : Adividyamaheshvari Stuti

File name : AdividyAmaheshvarIstutiH.itx

Category : devii, shivarahasya, stuti, devI

Location : doc_devii

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 13 | 159.2-175||

Latest update : April 28, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 28, 2024

*sanskritdocuments.org*

# आदिविद्यामहेश्वरीस्तुतिः

विष्णुरुवाचः
जय मातर्जगद्वन्द्ये जयं विश्वेश्वरप्रिये ॥ १५९॥

जय कल्याणदे भव्ये जय सौभाग्यसंश्रये ।
जय कल्याणनिलये जय वेदान्तसंस्तुते ॥ १६०॥

जय पुण्यैकनिलये जय कारुण्यसंश्रये ।
जय वेदान्तसंवेद्ये जय नित्ये निरञ्जने ॥ १६१॥

जय विद्यैकनिलये जयापर्णे जयामले ।
जय मञ्जुलमन्दारपुष्पमालाविराजिते ॥ १६२॥

जय नीलोत्पलानीललसन्नयनभासुरे ।
जय सर्वकलापूर्णचन्द्रबिम्बनिभानने ॥ १६३॥

जय विद्रुमबिम्बाभभव्याधरविराजिते ।
जय दाडिमबीजाभदन्तराजिविराजिते ॥ १६४॥

जय शार्ङ्गनिभानीलभ्रूवल्लीसमलङ्कृते ।
जय भृङ्गावलीतुल्यकेशपाशविराजिते ॥ १६५॥

जय सिन्दूरसम्बन्धसीमन्तललितालके ।
जय सन्नीरसम्बद्धघुसृणारुणभालके ॥ १६६॥

जय कम्बुसमानाभकण्ठमण्डलशोभिते ।
जय हेममृणालाभबाहुवल्लीविराजिते ॥ १६७॥

जय कोकनिभारक्तहस्तपद्मविराजिते ।
जय कारुण्यपीयूषपूर्णवक्षोजशोभिते ॥ १६८॥

जय कामजयोत्पन्नरोमराजिविराजिते ।
जय त्रिवलिसम्बद्ध मनोहरकृशोदरे ॥ १६९॥

जय सिन्दूरकदलीसन्निभोरुमनोहरे ।
जय देवर्षिगन्धर्वप्रणमत्पदपङ्कजे ॥ १७० ॥

जयानवद्ये निर्द्वन्द्वे निर्मले लयवर्जिते ।
जय विद्ये महाविद्ये जयानन्दे जयोत्तमे ॥ १७१ ॥

जय लीलाविलासार्थस्वीकृतानन्तविग्रहे ।
जय मौनिमनोरम्यसिह्मासनवराश्रये ॥ १७२ ॥

जय रत्नोच्चनिलयरत्नावलिविराजिते ।
जय दिव्यमणिभ्राजद्धेमाभरणभूषिते ॥ १७३ ॥

जय मातर्महादेवि जय मातर्महेश्वरि ।
जय मातस्त्रिणयने जय मातः सुरेश्वरि ॥ १७४ ॥

जय मातः प्रसीद त्वं जय मातः शिवप्रिये ।
जय मातः कृपापूर्णे जय मातः परात्परे ॥ १७५ ॥

॥ इति शिवरहस्यान्तर्गते आदिविद्यामहेश्वरीस्तुतिः सम्पूर्णा ॥

- ॥ श्रीशिवरहस्यम् उग्राख्यः सप्तमांशः । अध्यायः १३ । १५९।२-१७५ ॥

- .. shrIshivarahasyam ugrAkhyaH saptamAMshaH . adhyAyaH 13 . 159.2-175 ..

Notes:
Viṣṇu विष्णु eulogizes Maheśvarī महेश्वरी (Pārvatī पार्वती / Umā उमा) as ĀdiVidyā आदिविद्या.

Encoded and proofread by Ruma Dewan

*Adividyamaheshvari Stuti*

pdf was typeset on April 28, 2024

Please send corrections to *sanskrit@cheerful.com*